1. असतो मा सदगमय।

तमसो मा ज्योतिर्गमय।

मृत्योर्मामृतम् गमय॥

2. ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

3. ॐ भूर्भुवः स्वः तत् सवितुर्वरेण्यं।

भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥

4. ॐ सहनाववतु सहनौ भुनक्तु सह वीर्यं करवावहै।

तेजस्विनावधीतमस्तु मा विद्विषावहै॥

ॐ शान्तिः शान्तिः शान्तिः॥

5. त्वमेव माता च पिता त्वमेव
त्वमेव बंधू च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव॥

6. मूकं करोति वाचालं पंगुं लंघयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्दमाधवम्॥

7. या कुन्देन्दु तुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥

8. वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ।
निर्विघ्नं कुरु मे देव शुभकार्येषु सर्वदा॥

9. शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्।

विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्॥

लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्।

वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

10. सर्वे भवन्तु सुखिनः।

सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु।

मा कश्चित् दुःख भाग्भवेत्॥

11. वन्दे मातरम्। वन्दे मातरम्।

वन्दे मातरम्। वन्दे मातरम्॥

सुजलाम् सुफलाम् मलयजशीतलाम्।

शस्यश्यामलाम् मातरम्। वन्दे मातरम्॥

शुभ्रज्योत्स्ना पुलकितयामिनीम्।

फुल्लकुसुमितद्रुमदलशोभिनीम्।

सुहासिनीम्। सुमधुरभाषिणीम्।

सुखदां वरदाम् मातरं॥ वन्दे मातरम्॥

## અ

12. अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्।

अधनस्य कुतो मित्रं अमित्रस्य कुतः सुखम्॥

13. अग्निः शेषं ऋणः शेषं शत्रुः शेषं तथैव च।

पुनः पुनः प्रवर्धेत तस्मात् शेषं न कारयेत्॥

14. अग्निहोत्रं गृहं क्षेत्रं गर्भिणीं वृद्धबालकौ।

रिक्तहस्तेन नोपेयाद् राजानं देवतां गुरुम्॥

15. अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत्।

गृहीत इव केशेषु मृत्युना धर्मम् आचरेत्॥

16. अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।

नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥

17. अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत्।

शनैः शनैश्च भोक्तव्यं वित्तम् स्वयमुपार्जितम्॥

18. अतिथि देवो भव।

19. अतिदानाद्धतः कर्णस्त्वतिलोभात् सुयोधनः।

अतिकामाद्दशग्रीवस्त्व् अति सर्वत्र वर्जयेत्॥

20. अतिपरिचयादवज्ञा सततगमनात् अनादरो भवति।

मलये भिल्ला पुरांध्री चंदनतरुकाष्ठम् इंधनम् कुरुते॥

21. अतिवादांस् तितिक्षेत नाभिमन्येत् कथंचन।

क्रोध्यमानः प्रियं ब्रूयाद् आक्रुष्टः कुशलं वदेत्॥

22. अतिस्नेहः पापशङ्की।

23. अद्यापि दुर्निवारं स्तुतिकन्या वहति नाम कौमारम्।

सद्भ्यो न रोचते सा असन्तः अपि अस्यै न रोचन्ते॥

24. अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।

अनुग्रहश्च दानं च एष धर्मः सनातनः॥

25. अनभ्यासे विषं विद्या अजीर्णे भोजनं विषं।

विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषं॥

26. अनेजदैकं मनसो जवीयो नैनद्देवा आप्नुवन पूर्वमर्षत।

तद्धावतो न्यानत्येति तिष्ठत तस्मिन्नपो मातरिश्वा दधाति॥

27. अन्नदानं परं दानं विद्या दानम् अतः परम्।

अन्नेन क्षणिका तृप्तिः यावज्जीवञ्च विद्यया॥

28. अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति।

पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति॥

29. अपमानितोऽपि कुलजो न वदति पुरुषं स्वभावदाक्षिण्यात्।

नहि मलयचन्दनतरुः परशुप्रहतः स्रवेत् पूयम्॥

30. अपि क्रियार्थम् सुलभं समित्कुशं जलानि अपि स्नानविधिक्षमं ते।

अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यम् खलु धर्मसाधनम्॥

31. अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥

32. अपूर्वः कोपि कोशोयं विद्यते तव भारति।

व्ययतो वृद्धिम् आयाति क्षयम् आयाति संचयात्॥

33. अयं निजः परो वेऽति गणना लघुचेतसाम्।

उदारचरितानां तु वसुधैव कुटुम्बकम्॥

34. अर्थातुराणां न गुरुर्न बन्धुः कामातुराणां न भयं न लज्जा।

विद्यातुराणां न सुखं न निद्रा क्षुधातुराणां न रुचिर्न वेला॥

35. अल्पकार्यकराः सन्ति ये नरा बहुभाषिणः।

शरत्कालिनमेघास्ते नूनं गर्जन्ति केवलं॥

36. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।

तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तसन्तिनः॥

37. अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।

गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥

38. अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च।

अजापुत्रं बलिं दद्यात् देवो दुर्बलघातकः॥

39. अश्वत्थामा बलि र्व्यासो हनुमांश्च बिभीषणः।

कृपः परशुरामश्च सप्तैते चिरजीविनः॥

40. अश्वस्य भूषणं वेगो मत्तं स्याद् गजभूषणम्।

चातुर्यम् भूषणं नार्या उद्योगो नरभूषणम्॥

41. अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।

परोपकारः पुण्याय पापाय परपीडनम्॥

42. अहन्यहनि भूतानि गच्छन्ति यमालयम्।

शेषाः स्थावरमिच्छन्ति किमाश्चर्यमतः परम्॥

43. अहं ब्रह्मास्मि।

44. अहिंसा परमो धर्मः।

45. अहो दुर्जनसंसर्गात् मानहानिः पदे पदे।

पावको लोहसङ्गेन मुद्गरैरभिताड्यते॥

# આ

46. आ नो भद्रा क्रतवो यन्तु विश्वतः।

47. आकारैणैव चतुराः तर्कयन्ति परेङ्गितम्।
गर्भस्थं केतकीपुष्पमामोदेनेव षट्पदाः॥

48. आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः॥

49. आत्मनः मुखदोषेण बध्यन्ते शुकसारिकाः।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम्॥

50. आत्मनो गुरुः आत्मैव पुरुषस्य विशेषतः यत।
प्रत्यक्षानुमानाभ्याम श्रेयसवनुबिन्दते॥

51. आत्मपक्षं परित्यज्य परपक्षेषु यो रतः।

स परैर्हन्यते मूढः नीलवर्णशृगालवत्॥

52. आत्मवत सर्वभूतेषु यः पश्यति सः पण्डितः।

53. आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने।

जन्मान्तरसहस्त्रेषु दारिद्रयं नोपजायते॥

54. आर्ता देवान् नमस्यन्ति, तपः कुर्वन्ति रोगिणः।

निर्धनाः दानम् इच्छन्ति, वृद्धा नारी पतिव्रता॥

55. आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।

नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति॥

56. आशा नाम मनुष्याणां काचिदाश्चर्यशृङखला।

यया बद्धाः प्राधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत्॥

57. आस्ते भग आसीनस्य ऊर्ध्वस्तिष्ठति तिष्ठतः।

शेते निपद्यमानस्य चराति चरतो भगः॥

58. आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।

धर्मो हि तेषाम् अधिकोविशेषो धर्मेण हीनाः पशुभिः समानाः॥

# ઇ-ઈ

59. इतो भ्रष्टस्ततो नष्टः।

60. इदमद्य करिष्यामि श्वः कर्तास्मि इति वादिनम्।

कालो हरति संप्राप्तो नदीवेग इव द्रुमम् ॥

61. ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्॥

# उ-ऊ

62. उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।

क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति॥

63. उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः।

64. उत्सवप्रियाः खलु मनुष्याः।

65. उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम्।

सोत्साहस्य च लोकेषु न किंचिदपि दुर्लभम्॥

66. उदये सविता रक्तो रक्तश्चास्तमने तथा।

सम्पत्तौ च विपत्तौ च साधूनामेकरूपता॥

67. उदारस्य तृणं वित्तं शूरस्य मरणं तृणं।

विरक्तस्य तृणं भार्या निस्पृहस्य तृणं जगत्॥

68. उद्यमस्साहसं धैर्यं बुद्धिश्शक्तिः पराक्रमः।

षड् एते यत्र वर्तन्ते देवः तत्र सहायकृत्॥

69. उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

70. उद्योगिनं पुरुष सिंहमुपैति लक्ष्मीः।

71. उपकारगृहीतेन शत्रुणा शत्रुमुध्दरेत्।

पादलग्नं करस्थेन कण्टकेनैव कण्टकम्॥

72. उपकारोऽपि नीचानां अपकारो हि जायते।

पयःपानं भुजङ्गानां केवलं विषवर्धनम्॥

73. उष्ट्राणां विवाहेषु गीतं गायन्ति गर्दभाः।

परस्परं प्रशंसन्ति अहो रूपं अहो ध्वनिः॥

# એ-ઐ-ઓ-ઔ-અં-અઃ

74. एक एव खगो मानी चिरंजीवतु चातकम्।

म्रियते वा पिपासार्तो याचते वा पुरंदरम्॥

75. एकं सद् विप्राः बहुदा वदन्ति।

अग्निं यमं मातरिश्वानम् आहुः॥

76. एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।

वासितं तद्वनं सर्वम् सुपुत्रेण कुलं यथा॥

77. एकोऽहं बहु स्याम् प्रजायेय।

78. कन्या वरयते रुपं माता वित्तं पिता श्रुतम्।
बान्धवाः कुलमिच्छन्ति मिष्टान्नम् इतरेजनाः॥

79. कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती।
करमूले तु गोविन्दः प्रभाते करदर्शनम्॥

80. कर्ता कारयिता चैव प्रेरकश्च अनुमोदकः।
सुकृते दुष्कृते चापि चत्वारः समभागिनः॥

81. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

82. कस्यैकान्तं सुखम् उपनतं दु:खम् एकान्ततो वा।
नीचैर् गच्छति उपरि च दशा चक्रनेमिक्रमेण॥

83. काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥

84. काकचेष्टा वकोध्यानं श्वाननिद्रा तथैव च।
अल्पहारी गृहत्यागी विद्यार्थी पंचलक्षणम्॥

85. कान्तावियोगः स्वजनापमानं ऋणस्य शेषं कुनृपस्य सेवा।
दारिद्र्यभावाद् विमुखं च मित्रं विनाग्निना पञ्च दहन्ति कायम्॥

86. कार्यार्थीर् भजते लोकः यावत्कार्यम् न सिध्यति।
उत्तीर्णे च परे पारे नौकाया किं प्रयोजनम्॥

87. कार्येषु मन्त्री करणेषु दासी भोज्येषु माता शयनेषु रम्भा।

धर्मानुकूला क्षमया धरित्री भार्या च षाड्गुण्यवतीह दुर्लभा॥

88. काले मृदुर् यो भवति काले भवति दारुणः।

स वै सुखम् अवाप्नोति लोकेऽमुष्मिन्न् इहैव च॥

89. कालो वा कारणं राज्ञः राजा वा कालकारणं।

इति ते संशयो मा भूत् राजा कालस्य कारणम्॥

90. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।

व्यसनेन तु मूर्खाणां निद्रया कलहेन वा॥

91. काव्येषु नाटकं रम्यं तत्र रम्यं शकुन्तला।

तत्रापि च चतूर्थोऽङ्को तत्र श्लोकचतुष्टयम्॥

92. किं वाससा इत्यत्र विचारणीयं वासः प्रधानं खलु योग्यतायै।

पीताम्बरं वीक्ष्य ददौ स्वकन्यां दिगम्बरं वीक्ष्य विषं समुद्रः॥

93. किम् अशक्यं बुद्धिमतां किम् असाध्यं निश्चयं दृढं दधताम्।

किम् अशक्यं प्रियवचसां किम् अलभ्यंम् इहोद्यमस्थानाम्॥

94. कुलस्यार्थे त्यजेदेकम् गाम्स्यार्थे कुलम्त्यजेत्।

गामं जनपदस्यार्थे आत्मार्थे पृथिवीम् त्यजेत्॥

95. कुसुमं वर्णसंपन्नंगन्धहीनं न शोभते।

न शोभते क्रियाहीनं मधुरं वचनं तथा॥

96. कृतस्य करणं नास्ति मृतस्य मरणं तथा।

गतस्य शोचना नास्ति ह्येतद् वेदविदां मतम्॥

97. कृपणेन समो दाता न भूतो न भविष्यति।

अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति॥

98. केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः

न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।

वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते

क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

99. को न याति वशं लोके मुखे पिण्डेन पूरितः।

मृदङ्गो मुखलेपेन करोति मधुरध्वनिम्॥

100. को हि भारः समर्थानां किम् दूरं व्यवसायिनाम्।

को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥

101. क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।

स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥

## ખ

102. खलः करोति दुर्वृत्तं नूनं फलति साधुषु।

दशाननोऽहरत् सीतां बन्धनं तु महोदधेः॥

## ગ

103. गहना कर्मणो गतिः।

104. गुणवज्जनसंसर्गात् याति नीचोऽपि गौरवम्।

पुष्पमालाप्रसङ्गेन सूत्रम् शिरसिधार्यते॥

105. गुणाः पूजास्थानम् गुणिषु, न च वयं, न च लिंगं।

# ध

106. घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम्।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्॥

107. घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम्।
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम्।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णम्।
प्राणान्तेऽपि हि प्रकृतिविकृतिर्जायते नोत्तमानाम्॥

# च

108. चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥

109. चरैवेति चरैवेति।

110. चिन्तनीया हि विपदां आदावेव प्रतिक्रिया।

न कूपखननं युक्तं प्रदीप्ते वान्हिना गृहे॥

## છ

111. छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः।

इति विमृशन्तः सन्तः सन्तप्यन्ते न विप्लुता लोके॥

## જ-ઝ

112. जयन्तु ते सुकृतिनो रससिद्धाः कवीश्वराः।

नास्ति एषां यशः काये जरामरणजं भयम्॥

113. जले तैलं खले गुह्यं पात्रे दानं मनागपि।

प्राज्ञे शास्त्रं स्वयं याति विस्तार वस्तुशक्तित:॥

114. जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।

तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥

115. जानामि धर्मं न च मे प्रावृत्तिः।

जानाम्यधर्मं न च मे निवृत्तिः॥

116. जीवो जीवस्य जीवनम्।

117. ज्येष्ठत्वं जन्मना नैव गुणैर्ज्येष्ठत्वमुच्यते।

गुणात् गुरुत्वमायाति दुग्धं दधि घृतं क्रमात्॥

# ટ-ઠ-ડ-ઢ-ણ

# ત-થ

118. तत् कर्म यत् न बन्धाय सा विद्या या विमुक्तये।

आयासाय अपरं कर्म विद्या अन्या शिल्पनैपुणम्॥

119. तदेजति तन्नैजति तद्दूरे तद्वन्तिके।

तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः॥

120. तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे।

कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥

121. तावत् भयस्य भेतव्यं यावत् भयं न आगतम्।

आगतं हि भयं वीक्ष्य प्रहर्तव्यं अशंकया॥

122. ते हि नो दिवसा गताः।

123. त्यजन्ति मित्राणि धनैर्विहीनं पुत्राश्च दाराश्च सज्जनाश्च।

तमर्थवन्तं पुनराश्रयन्ति अर्थो हि लोके मनुषस्य बन्धुः॥

124. त्यजेत् क्षुधार्ता जननी स्वपुत्रं खादेत् क्षुधार्ता भुजगी स्वमण्डम्।

बुभुक्षितः किं न करोति पापं क्षीणा जना निष्करूणा भवन्ति॥

125. त्यजेद् धर्मं दयाहीनं विद्याहीनं गुरुं त्यजेत्।

त्यजेत् क्रोधमुखीं भार्यां निःस्नेहान् बान्धवांस् त्यजेत्॥

126. त्रियाचरित्रं पुरुषस्य भग्यं।

दैवो न जानाति कुतो नरम्॥

127. दर्शने स्पर्शणे वापि श्रवणे भाषणेऽपि वा।

यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते॥

128. दाता लघुर् अपि सेव्यो भवति न कृपणो महान् अपि समृद्ध्या।

कूपोऽन्तः स्वादुजलः प्रीत्यै लोकस्य न समुद्रः॥

129. दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।

यो न ददाति न भुङ्क्ते तस्य तृतीय गतिर्भवति॥

130. दुर्जनः परिहर्तव्यः विद्यया अलङ्कृतोऽपि सन्।

मणिना भूषितः सर्पः किम् असौ न भयङ्करः॥

131. दुर्जनः प्रियवादीति नैतद्विश्वासकारणम्।

मधु तिष्ठति जिव्हाग्रे हृदये तु हलाहलम्॥

132. दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः।

सर्पो दशति कालेन दुर्जनस् तु पदे पदे

133. दुर्जनेन समं सख्यं द्वेषञ्चापि न कारयेत्।

उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्॥

134. दुर्जनैः सह वासो हि ध्रुवं नाशाय कल्पते।

काकस्य सहवासेन हंसो नष्टो वृथा पुरा॥

135. दुर्बलस्य बलं राजा बालानां रोदनं बलम्।

बलं मूर्खस्य मौनित्वं, चौराणाम् अनृतम् बलम्॥

136. दुष्टस्य दण्डः स्वजनस्य पूजा

न्यायेन कोशस्य हि वर्धनं च।

अपक्षपातः निजराष्ट्ररक्षा

पञ्चैव धर्माः कथिताः नृपाणाम्॥

137. दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः।

ससर्पे च गृहे वासो मृत्युरेव न संशयः॥

138. दूरस्थाः पर्वताः रम्याः वेश्याः च मुखमण्डने।

युध्यस्य तु कथा रम्या त्रीणि रम्याणि दूरतः॥

139. दूरस्थोऽपि न दूरस्थो यो यस्य मनसि स्थितः।

यो यस्य हृदये नास्ति समीपस्थोऽपि दूरतः॥

140. दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्।

सत्यपूतं वदेद्वाचं मनः पूतं समाचरेत्॥

# ध

141. धनधान्यप्रयोगेषु विद्यासङ्ग्रहणेषु च।
आहारे व्यवहारे च त्यक्तलज्जस्सुखी भवेत्॥

142. धर्मो रक्षति रक्षितः।

143. धिक् तस्य जन्म यो लोके पित्रा विज्ञायते नरः।

# न

144. न अभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेंद्रता॥

145. न कश्चित् कस्यचित् मित्रं न कश्चित् कस्यचित् रिपुः।
कारणेनैव जायन्ते मित्राणि रिपवोऽपि वा॥

146. न कालस्य प्रियः कश्चिन्न द्वेष्योऽपि कपीश्वर।

कालः कालयते सर्वान्सर्वः कालेन बध्यते॥

147. न च विद्यासमो बन्धुः न च व्याधिसमो रिपुः।

न चापत्यसमो स्नेहः न च धर्मो दयापरः॥

148. न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारी।

व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥

149. न जातु कामः कामानामुपभोगेन शाम्यति।

हविषा कृष्णमत्र्मेव भुय एवाभिवर्धते॥

150. न जायते म्रियते वा कदाचिन् नायं भूत्वा भविता वा न भूयः।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥

151. न तु अहं कामये राज्यं न स्वर्गं न पुनर्भवम्।

कामये दुःखतप्तानां प्राणिनाम् आर्तिनाशनम्॥

152. न देवा दण्डमादाय रक्षन्ति पशुपालवत्।

यं तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तम्॥

153. न धैर्येण विना लक्ष्मीर्न शौर्येण विना जयः।

न ज्ञानेन विना मोक्षो न दानेन विना यशः॥

154. न भूतपूर्वं न कदापि वार्ता हेम्नः कुरङ्गो न कदापि दृष्टः।

तथापि तृष्णा रघुनन्दनस्य विनाशकाले विपरीतबुद्धिः॥

155. न भूतो न भविष्यति।

156. न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति।

157. न हि कश्चिद् आचारः सर्वहितः संप्रवर्तते।

158. न हि कस्य प्रियः को वा विप्रियो वा जगत् त्रये।

काले कार्यवाशात् सर्वे भवन्त्य् एवाप्रियाः प्रियाः॥

159. न हि ज्ञानेन सदृशम् पवित्रमिह विद्यते।

तत्स्वयं योगसंसिद्धिः कालेनात्मनि विन्दति॥

160. नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनाः।

शुष्ककाष्ठश्च मूर्खश्च न नमन्ति कदाचन॥

161. नरस्य आभरणं रूपं रूपस्य आभरणं गुणः।

गुणस्य आभरणं ज्ञानं ज्ञानस्य आभरणं क्षमा॥

162. नरो वा कुंजरो वा।

163. नाक्षरं मंत्ररहीतं नमूलंनौषधिम्।

अयोग्य पुरूषं नास्ति योजकस्तत्रदुर्लभः॥

164. नाभिषेको न च संस्कारः सिंहस्य कृयते मृगैः।

विक्रमार्जित सत्वस्य स्वयमेव मृगेन्द्रता॥

165. नास्ति भार्यासमं किञ्चिन्नरस्यार्तस्य भेषजम्॥

166. नास्ति विद्या समं चक्षू नास्ति सत्य समं तपः।

नास्ति राग समं दुःखम् नास्ति त्याग समं सुखम्॥

167. नायमात्मा प्रवचनेन लभ्यो

न मेधया न बहुना श्रुतेन।

यमेवैष वृणुते तेन लभ्यः

तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥

168. निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु

लक्ष्मीः स्थिरा भवतु गच्छतु वा यथेष्टम्।

अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥

169. निर्धनस्य कुतः सुखम्।

170. निर्विषेणापि सर्पेण कर्तव्या महति फणा।
विषमस्तु न चाप्यस्तु फटाटोपो भयंकरः॥

171. नेति नेति।

172. नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥

173. परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।

परोपकाराय दुहन्ति गावः परोपकारार्थमिदम् शरीरम्॥

174. परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै।

विस्मरन्तीह शिष्टत्वं स्वकार्ये समुपस्थिते॥

175. परोपदेशे पांडित्यं सर्वेषां सुकरं नृणाम्।

धर्मे स्वीयमनुष्ठानं कस्यचित् सुमहात्मनः॥

176. परोऽपि हितवान् बन्धुः बन्धुरपि अहितः परः।

अहितो देहजो व्याधिः हितम् आरण्यमौषधम्॥

177. पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या

नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।

आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुंतला पतिगृहं सर्वैरनुज्ञायताम्॥

178. पिण्डे पिण्डे मतिर्भिन्ना कुण्डे कुण्डे नवं पयः।
जातौ जातौ नवाचाराः नवा वाणी मुखे मुखे॥

179. पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधितिष्ठित कालिदासः।
अद्यापि तत्तुल्य कवेराभावात् अनामिका सार्थवती बभूव॥

180. पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥

181. पुस्तकस्था तु या विद्या परहस्तगतं धनं।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥

182. पृथ्वीव्यां त्रीणि रत्नानि जलम् अन्नम् सुभाषितम्।

मूढैः पाषाणखण्डेषु रत्नसंज्ञा प्रदीयते॥

183. प्रथमग्रासे मक्षिकापातः।

184. प्रथमवयसि पीतं तोयमल्पम् स्मरन्तः शिरसि

निहीतभाराः नारीकेला नराणाम् ददति।

जलमनल्पात स्वादमाजिवीतान्तम्

नही कृतमुपकारं साधवो विस्मरन्ति॥

185. प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनं।

तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति॥

186. प्रारभ्यते न खलु विघ्न भयेन नीचैः

प्रारभ्य विघ्न विहता विरमन्ति मध्याः।

विघ्नैः पुनः पुनर् अपि प्रतिहन्यमानाः

प्रारब्धम् उत्तम जना न परित्यजन्ति॥

187. प्रियवाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥

## બ

188. बहुजनहिताय बहुजनसुखाय।

189. बहुरत्ना वसुन्धरा।

190. बुद्धिर्यस्य बलं तस्य।

## ભ

191. भज गोविन्दं भज गोविन्दम् गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते काले न हि न हि रक्षति डुकृञ् करणे॥

192. भो दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः।
पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन॥

193. भोगाः न भुक्ता वयमेव भुक्ताः।
तृष्णा न जीर्णा वयमेव जीर्णाः॥

194. भ्रमन् वनान्ते नवमंजरीषु न षट्पदो गन्धफलीमजिघ्रत्।
सा किं न रम्या स च किं न रन्ता बलीयसी केवलमीश्वरेच्छा॥

## म

195. मधुरेण समापयेत्।

196. मन एव मनुष्याणां कारणं बन्धमोक्षयो।

बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥

197. मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।

यादृशी भावना यस्य सिद्धिर् भवति तादृशी॥

198. मर्कटस्य सुरापानं तस्य वृश्चिकदंशनम्।

तन्मध्ये भूतसंचारो यद्वा तद्वा भविष्यति॥

199. महाजनस्य संसर्गः कस्य नोन्नतिकारकः।

पद्मपत्रस्थितम् तोयम् धत्ते मुक्ताफलश्रियम्॥

200. मा दद्यात् खलसङ्घेषु कल्पनामधुरागिरः।

यथा वानरहस्तेषु कोमलाः कुसुमस्रजः॥

201. मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।

यत्क्रौञ्चमिथुनादेकम् अवधीः काममोहितम्॥

202. माता शत्रुः पिता वैरी येन बालो न पाठितः।

सभामध्ये न शोभते हंसमध्ये बको यथा॥

203. मुखं प्रसन्नं विमला च दृष्टिः

कथानुरागो मधुरा च वाणी।

स्नेहोऽधिकः सम्भ्रम दर्शनं च

सदानुरक्तस्य जनस्य चिह्नम्॥

204. मुर्खा यत्र न पूज्यते धान्यं यत्र सुसंचितम्।

दंपत्यो कलहः नास्ति तत्र श्रीः स्वयमागतः॥

205. मूर्खस्य पंच चिह्नानि गर्वो दुर्वचनं तथा।

क्रोधश्च दृधवादश्च परवाक्येष्वनादरः॥

206. मूलोनास्ति कुतोः शाखा।

207. मृगा मृगैः संगमुपव्रजन्ति गावश्च गोभिस्तुरगास्तुरंगैः।

मूर्खाश्च मूर्खैः सुधयः सुधीभिः समानशीलव्यसनेषु सख्यं॥

# य

208. यत्र नार्यः तु पूज्यन्ते रमन्ते तत्र देवताः।

यत्र एताः तु न पूज्यन्ते सर्वास्तत्र अफलाः क्रियाः॥

209. यथा खरः चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य।

एवं हि शास्त्राणि बहून्यधीत्य अर्थेषु मूढाः खरवद्वहन्ति॥

210. यथा देशस्तथा भाषा यथा राजा तथा प्रजा।

यथा भूमिस्तथा तोयं यथा बीजस्तथांकुरः॥

211. यथा बीजं विना क्षेत्रम् उप्तं भवति निष्फलम्।

तथा पुरुष कारेण विना दैवं न सिध्यति॥

212. यथा मधु समादत्ते रक्षन् पुष्पाणि षट्पदः।

तद्वदर्थान् मनुष्येभ्यः आदद्यात् अविहिंसया॥

213. यथा शिखा मयूराणां नागानां मणयो यथा।

तद् वेदांगशास्त्राणां गणितं मूर्ध्नि वर्तते॥

214. यदा यदा हि धर्मस्य ग्लानिर्भवति भारतः।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

परित्राणाय साधूनां विनाशाय च दुश्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

215. यस्तु सञ्चरते देशान् सेवते यस्तु पण्डितान्।

तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि॥

216. यस्तु सर्वाणि भूतान्यात्मनेवानुपश्यति।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥

217. यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः।

न च विद्याऽऽगमः कश्चित् तं देशं परिवर्जयेत्॥

218. यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।

लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥

219. यस्यास्ति वित्तं स वरः कुलीनः

स पण्डितः स श्रुतवान् गुणज्ञः।

स एव वक्ता स च दर्शनीयः

सर्वे गुणाः काञ्चनमाश्रयन्ते॥

220. यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति।

तस्य दिवाकरकिरणैः नलिनीदलमिव विस्तारिता बुद्धिः॥

221. यानि कानि च मित्राणि कृतानि शतानि च।

पश्य मूषकमित्रेण कपोताः मुक्तबन्धनाः॥

222. यावच्चंद्रदिवाकरौ।

223. यावत् जीवेत् सुखेन जीवेत्।

ऋणं कृत्वा धृतं पिबेत्॥

224. ये च मूढतमा: लोके ये च बुद्धे: परं गता:।

ते एव सुखम् एधन्ते मध्यम: क्लिश्यते जन:॥

225. येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।

ते मर्त्यलोके भुविभारभूता मनुष्यरूपेण मृगाश्चरन्ति॥

226. यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते।

ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च॥

227. योगः कर्मसु कौशलम्।

228. यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता।

एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥

229. रम्याणि वीक्ष्य मधुरांश् च निशम्य शब्दान्
पर्युत्सुकी भवति यत् सुखेतेऽपि जन्तुः।
तच् चेतसा स्मरति नूनम् अबोधपूर्वं
भाव स्थिराणि जननान्तर सौहृदानि॥

230. रम्यान्तरः कमलिनीहरितैः सरोभिश्छायाद्रुमैर्नियमितार्कमयूखतापः।
भूयात्कुशेशयरजोमृदुरेणुरस्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः॥

231. राजा राष्ट्रकृतं पापं राज्ञः पापं पुरोहितः।
भर्ता च स्त्रीकृतं पापं शिष्यपापं गुरुस् तथा॥

232. रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पंकजश्रीः।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार॥

## ल

233. लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥

234. लालयेत् पंचवर्षाणि दशवर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवदाचरेत्॥

235. लोभाविष्टो नरो वित्तम् वीक्ष्यते न तु संकटम्।
दुग्धं पश्यति मार्जारी न तथा लगुडाहतिम्॥

## व

236. वज्रादपि कठोराणि मृदूनि कुसुमादपि।

लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥

237. वनानि दहतो वह्ने सखा भवति मारुतः।

स एव दीपनाशाय कृशे कस्यस्ति सुहृदम्॥

238. वनेऽपि सिंहा मृगमांसभक्षिणो बुभुक्षिता नैव तृणं चरन्ति।

एवं कुलीना व्यसनाभिभूता न नीचकर्माणि समाचरन्ति

239. वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः

सम इह परितोषो निर्विशेषो विषेशः।

स तु भवतु दरिद्रो यस्य तृष्णा विशाला

मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥

240. वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

241. वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।

तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥

242. विकृतिं नैव गच्छन्ति संगदोषेण साधवः।

आवेष्टितं महासर्पैश्चंदनं न विषायते॥

243. विजेतव्या लङ्का चरणतरणीया जलनिधिः

विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः।

तथाप्येको रामः सकलमवधीद्राक्षसकुमम्

क्रियासिद्धिः सत्वे भवति महतां नोपकरणे॥

244. विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।

परलोके धनं धर्मः शीलं सर्वत्र वै धनम्॥

245. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं

विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः॥

विद्या बन्धुजनो विदेशगमने विद्या परा देवता

विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥

246. विद्या विवादाय धनं मदाय खलस्य शक्तिः परपीडनाय।

साधोस्तु सर्वं विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय॥

247. विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

248. विषादप्यमृतं ग्राह्मं बालादपि सुभाषितम्।

अमित्रादपि सद्वृत्तं अमेध्यादपि कांचनम्॥

249. वीरभोग्या वसुन्धरा।

250. वृथा वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनम्।

वृथा दानं धनाढ्येषु वृथा दीपो दिवाऽपि च॥

251. वृच्चिशकस्य विषं पृच्छे मक्षिकायाः मुखे विषम्।

तक्षकस्य विषं दन्ते सर्वांगे दुर्जनस्य तत्॥

252. वैद्यराज नमस्तुभ्यं यमराजसहोदर।

यमस्तु हरति प्राणान् वैद्यो प्राणान् धनानि च॥

253. वाक्यं रसात्मकं काव्यम्।

254. व्यापारे वसते लक्ष्मी।

255. व्यासोच्छिष्टं जगत् सर्वं।

# श

256. शठे शाठ्यं समाचरेत्।

257. शतेषु जायते शूरः सहस्त्रेषु च पंडितः।
वक्ता दशसहस्त्रेषु दाता भवति वा न वा॥

258. शान्तितुल्यं तपो नास्ति तोषान्न परमं सुखम्।
नास्ति तृष्णापरो व्याधिर्न च धर्मो दयापर॥

259. शिरः शार्वं स्वर्गात्पततिशिरसस्तत् क्षितिधरं
महीधादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।

अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः॥

260. शुचिर्दक्षोऽनुरक्तश्च भृत्यः खलु सुदुर्लभः।

261. शुभस्य शीघ्रं।

262. शुभास्ते पन्थानः संतु।

263. शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
साधवो न हि सर्वत्र चन्दनं न वने वने॥

# स

264. स हि भवति दरिद्रो यस्य तृष्णा विशाला।
मनसि च परितुष्टे कोर्थवान् को दरिद्राः॥

265. संग्रहैकपरः प्रायः समुद्रोपि रसातले।

दातारं जलदं पश्य गर्जन्तं भुवनोपरी॥

266. सत्यं ब्रूयात् प्रियं ब्रूयत् न ब्रूयात् सत्यमप्रियं।

प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः॥

267. सत्यं वद धर्मं चर स्वाध्यायान्मा प्रमदः।

268. सत्यमेव जयते नानृतम्।

269. सत्यस्य वचनं श्रेयः सत्यादपि हितंवदेत्।

यद्भूतहितमत्यन्तं अेतत् सत्यं मतं मम॥

270. सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।

यस्मिन्न् एव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥

271. सम्पूर्णकुम्भो न करोति शब्दं अर्धो घटो घोषमुपैति नूनं।
विद्वान् कुलीनो न करोति गर्वं मूढास्तु जल्पन्ति गुणैर्विहीनाः॥

272. सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः।
सर्पः शाम्यति मन्त्रैश्च दुर्जनः केन शाम्यति॥

273. सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनः।
सर्पो दशति कालेन दुर्जनस्तु पदे पदे॥

274. सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः॥

275. सामदाने भेददण्डावित्युपायचतुष्टयम्।
हस्त्यश्व रथ पादातिं सेनाङ्गंस्यात् चतुष्टयम्॥

276. सामर्थ्यमूलं स्वातन्त्र्यं श्रममूलं च वैभवम्।

न्यायमूलं सुराज्यं स्यात् संघमूलं महाबलम्॥

277. साहसे श्रीः प्रतिवसति।

278. साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।

तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम्॥

279. साक्षराः विपरीताश्चेत् राक्षसाः एव केवलम्।

सरसो विपरीतश्चेत् सरसत्वं न मुञ्चति॥

280. सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम्।

सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति॥

281. सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥

282. सुखस्यानन्तरं दुःखम् दुःखस्यानन्तरं सुखम्।
न नित्यं लभते दुःखं न नित्यं लभते सुखम्॥

283. सुखार्थी वा त्यजेत विद्या विद्यार्थी वा त्यजेत सुखम।
सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतो सुखम॥

284. सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥

285. सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्॥

286. स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत्॥

287. स्यात् कज्जलं सिन्धु पात्रं
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदापि तव गुणानां ईश पारं न याति॥

288. श्रुति र्विभिन्ना स्मृतयोऽपि भिन्नाः
नैको मुनि र्यस्य वचः प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायाम्
महाजनो येन गतः स पन्थाः॥

289. श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन॥

290. स्वधर्मे निधनम् श्रेयम् परधर्मो भयावहः।

291. स्वाभिमानो धनंयेषां चिरजीवन्ति ते जनाः।

स्वाभिमानविहीनानां किं धनेन किमायुषा॥

## ष

292. षट्पदः पुष्पमध्यस्थो यथा सारं समुद्धरेत्।

तथा सर्वेषु शास्त्रेषु सारं गृह्णिन्त पण्डिताः॥

## ह-ळ

293. हंसः श्वेतो बकः श्वेतो को भेदो बकहंसयोः।

नीरक्षीरविवेके तु हंसः हंसो बको बकः॥

294. हीयते हि मतिस्तात् हीनैः सह समागतात्।

समैस्च समतामेति विशिष्टैश्च विशिष्टितम्॥

## क्ष

295. क्षणशः कणश्चैव विद्याम् अर्थं च साधयेत्।

क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥

296. क्षणे तुष्टः क्षणे रुष्टस्तुष्टो रुष्टः क्षणे क्षणे।

अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः॥

297. क्षणेक्षणे यद् नवतां उपैति स रूपः।

298. क्षमा बलमशक्तानाम् शक्तानाम् भूषणम् क्षमा।

क्षमा वशीकृते लोके क्षमया किं न सिध्यति॥

299. क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति।

अतृणे पतितो वह्निः स्वयमेवोपशाम्यति॥

## ज्ञ

300. ज्ञानं तु द्विविधं प्रोक्तं शाब्दिकं प्रथमं स्मृतम्।

अनुभवाख्यं द्वितीयं तुं ज्ञानं तदुर्लभं नृप॥